# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ८०

ततः पौलस्त्य सचिवाः श्रुत्वा चेन्द्रजितं हतम् ।
आचचक्षुरभिज्ञाय दशग्रीवाय सव्यथाः ॥ १॥

युद्धे हतो महाराज लक्ष्मणेन तवात्मजः ।
विभीषणसहायेन मिषतां नो महाद्युते ॥ २॥

शूरः शूरेण सङ्गम्य संयुगेष्वपराजितः ।
लक्ष्मणेन हतः शूरः पुत्रस्ते विबुधेन्द्रजित् ॥ ३॥

स तं प्रतिभयं श्रुत्वा वधं पुत्रस्य दारुणम् ।
घोरमिन्द्रजितः सङ्ख्ये कश्मलं प्राविशन्महत् ॥ ४॥

उपलभ्य चिरात्संज्ञां राजा राक्षसपुङ्गवः ।
पुत्रशोकार्दितो दीनो विललापाकुलेन्द्रियः ॥ ५॥

हा राक्षसचमूमुख्य मम वत्स महारथ ।
जित्वेन्द्रं कथमद्य त्वं लक्ष्मणस्य वशं गतः ॥ ६॥

ननु त्वमिषुभिः क्रुद्धो भिन्द्याः कालान्तकावपि ।
मन्दरस्यापि शृङ्गाणि किं पुनर्लक्ष्मणं रणे ॥ ७॥

अद्य वैवस्वतो राजा भूयो बहुमतो मम ।
येनाद्य त्वं महाबाहो संयुक्तः कालधर्मणा ॥ ८॥

एष पन्थाः सुयोधानां सर्वामरगणेष्वपि ।
यः कृते हन्यते भर्तुः स पुमान्स्वर्गमृच्छति ॥ ९॥

अद्य देवगणाः सर्वे लोकपालास्तथर्षयः ।
हतमिन्द्रजितं दृष्ट्वा सुखं स्वप्स्यन्ति निर्भयाः ॥ १०॥

अद्य लोकास्त्रयः कृत्स्नाः पृथिवी च सकानना ।
एकेनेन्द्रजिता हीना शून्येव प्रतिभाति मे ॥ ११॥

अद्य नैरृतकन्यायां श्रोष्याम्यन्तःपुरे रवम् ।
करेणुसङ्घस्य यथा निनादं गिरिगह्वरे ॥ १२॥

यौवराज्यं च लङ्कां च रक्षांसि च परन्तप ।
मातरं मां च भार्यां च क्व गतोऽसि विहाय नः ॥ १३॥

मम नाम त्वया वीर गतस्य यमसादनम् ।
प्रेतकार्याणि कार्याणि विपरीते हि वर्तसे ॥ १४॥

स त्वं जीवति सुग्रीवे राघवे च सलक्ष्मणे ।
मम शल्यमनुद्धृत्य क्व गतोऽसि विहाय नः ॥ १५॥

एवमादिविलापार्तं रावणं राक्षसाधिपम् ।
आविवेश महान्कोपः पुत्रव्यसनसम्भवः ॥ १६॥

घोरं प्रकृत्या रूपं तत्तस्य क्रोधाग्निमूर्छितम् ।
बभूव रूपं रुद्रस्य क्रुद्धस्येव दुरासदम् ॥ १७॥

तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नस्रबिन्दवः ।
दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिन्दवः ॥ १८॥

दन्तान्विदशतस्तस्य श्रूयते दशनस्वनः ।
यन्त्रस्यावेष्ट्यमानस्य महतो दानवैरिव ॥ १९॥

कालाग्निरिव सङ्क्रुद्धो यां यां दिशमवैक्षत ।
तस्यां तस्यां भयत्रस्ता राक्षसाः संनिलिल्यिरे ॥ २०॥

तमन्तकमिव क्रुद्धं चराचरचिखादिषुम् ।
वीक्षमाणं दिशः सर्वा राक्षसा नोपचक्रमुः ॥ २१॥

ततः परमसङ्क्रुद्धो रावणो राक्षसाधिपः ।
अब्रवीद्रक्षसां मध्ये संस्तम्भयिषुराहवे ॥ २२॥

मया वर्षसहस्राणि चरित्वा दुश्चरं तपः ।
तेषु तेष्ववकाशेषु स्वयम्भूः परितोषितः ॥ २३॥

तस्यैव तपसो व्युष्ट्या प्रसादाच्च स्वयम्भुवः ।
नासुरेभ्यो न देवेभ्यो भयं मम कदा चन ॥ २४॥

कवचं ब्रह्मदत्तं मे यदादित्यसमप्रभम् ।
देवासुरविमर्देषु न भिन्नं वज्रशक्तिभिः ॥ २५॥

तेन मामद्य संयुक्तं रथस्थमिह संयुगे ।

प्रतीयात्कोऽद्य मामाजौ साक्षादपि पुरन्दरः ॥ २६॥

यत्तदाभिप्रसन्नेन सशरं कार्मुकं महत् ।
देवासुरविमर्देषु मम दत्तं स्वयम्भुवा ॥ २७॥

अद्य तूर्यशतैर्भीमं धनुरुत्थाप्यतां महत् ।
रामलक्ष्मणयोरेव वधाय परमाहवे ॥ २८॥

स पुत्रवधसन्तप्तः शूरः क्रोधवशं गतः ।
समीक्ष्य रावणो बुद्ध्या सीतां हन्तुं व्यवस्यत ॥ २९॥

प्रत्यवेक्ष्य तु ताम्राक्षः सुघोरो घोरदर्शनान् ।
दीनो दीनस्वरान्सर्वांस्तानुवाच निशाचरान् ॥ ३०॥

मायया मम वत्सेन वञ्चनार्थं वनौकसाम् ।
किं चिदेव हतं तत्र सीतेयमिति दर्शितम् ॥ ३१॥

तदिदं सत्यमेवाहं करिष्ये प्रियमात्मनः ।
वैदेहीं नाशयिष्यामि क्षत्रबन्धुमनुव्रताम् ।
इत्येवमुक्त्वा सचिवान्खड्गमाशु परामृशत् ॥ ३२॥

उद्धृत्य गुणसम्पन्नं विमलाम्बरवर्चसं ।
निष्पपात स वेगेन सभायाः सचिवैर्वृतः ॥ ३३॥

रावणः पुत्रशोकेन भृशमाकुलचेतनः ।
सङ्क्रुद्धः खड्गमादाय सहसा यत्र मैथिली ॥ ३४॥

व्रजन्तं राक्षसं प्रेक्ष्य सिंहनादं प्रचुक्रुशुः ।
ऊचुश्चान्योन्यमाश्लिष्य सङ्क्रुद्धं प्रेक्ष्य राक्षसाः ॥ ३५॥

अद्यैनं तावुभौ दृष्ट्वा भ्रातरौ प्रव्यथिष्यतः ।
लोकपाला हि चत्वारः क्रुद्धेनानेन निर्जिताः ।
बहवः शत्रवश्चान्ये संयुगेष्वभिपातिताः ॥ ३६॥

तेषां सञ्जल्पमानानामशोकवनिकां गताम् ।
अभिदुद्राव वैदेहीं रावणः क्रोधमूर्छितः ॥ ३७॥

वार्यमाणः सुसङ्क्रुद्धः सुहृद्भिर्हितबुद्धिभिः ।
अभ्यधावत सङ्क्रुद्धः खे ग्रहो रोहिणीम् इव ॥ ३८॥

मैथिली रक्ष्यमाणा तु राक्षसीभिरनिन्दिता ।
ददर्श राक्षसं क्रुद्धं निस्त्रिंशवरधारिणम् ॥ ३९॥

तं निशाम्य सनिस्त्रिंशं व्यथिता जनकात्मजा ।
निवार्यमाणं बहुशः सुहृद्भिरनिवर्तिनम् ॥ ४०॥

यथायं मामभिक्रुद्धः समभिद्रवति स्वयम् ।
वधिष्यति सनाथां मामनाथामिव दुर्मतिः ॥ ४१॥

बहुशश्चोदयामास भर्तारं मामनुव्रताम् ।
भार्या भव रमस्येति प्रत्याख्यातोऽभवन्मया ॥ ४२॥

सोऽयं मामनुपस्थानाद्व्यक्तं नैराश्यमागतः ।
क्रोधमोहसमाविष्टो निहन्तुं मां समुद्यतः ॥ ४३॥

अथ वा तौ नरव्याघ्रौ भ्रातरौ रामलक्ष्मणौ ।
मन्निमित्तमनार्येण समरेऽद्य निपातितौ ।
अहो धिन्मन्निमित्तोऽयं विनाशो राजपुत्रयोः ॥ ४४॥

हनूमतो हि तद्वाक्यं न कृतं क्षुद्रया मया ।
यद्यहं तस्य पृष्ठेन तदायासमनिन्दिता ।
नाद्यैवमनुशोचेयं भर्तुरङ्कगता सती ॥ ४५॥

मन्ये तु हृदयं तस्याः कौसल्यायाः फलिष्यति ।
एकपुत्रा यदा पुत्रं विनष्टं श्रोष्यते युधि ॥ ४६॥

सा हि जन्म च बाल्यं च यौवनं च महात्मनः ।
धर्मकार्याणि रूपं च रुदती संस्मरिष्यति ॥ ४७॥

निराशा निहते पुत्रे दत्त्वा श्राद्धमचेतना ।
अग्निमारोक्ष्यते नूनमपो वापि प्रवेक्ष्यति ॥ ४८॥

धिगस्तु कुब्जामसतीं मन्थरां पापनिश्चयाम् ।
यन्निमित्तमिदं दुःखं कौसल्या प्रतिपत्स्यते ॥ ४९॥

इत्येवं मैथिलीं दृष्ट्वा विलपन्तीं तपस्विनीम् ।
रोहिणीमिव चन्द्रेण विना ग्रहवशं गताम् ॥ ५०॥

सुपार्श्वो नाम मेधावी रावणं राक्षसेश्वरम् ।
निवार्यमाणं सचिवैरिदं वचनमब्रवीत् ॥ ५१॥

कथं नाम दशग्रीव साक्षाद्वैश्रवणानुज ।
हन्तुमिच्छसि वैदेहीं क्रोधाद्धर्ममपास्य हि ॥ ५२॥

वेद विद्याव्रत स्नातः स्वधर्मनिरतः सदा ।
स्त्रियाः कस्माद्वधं वीर मन्यसे राक्षसेश्वर ॥ ५३॥

मैथिलीं रूपसम्पन्नां प्रत्यवेक्षस्व पार्थिव ।
त्वमेव तु सहास्माभी राघवे क्रोधमुत्सृज ॥ ५४॥

अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशीम् ।

कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः ॥ ५५ ॥

शूरो धीमान्रथी खड्गी रथप्रवरमास्थितः ।
हत्वा दाशरथिं रामं भवान्प्राप्स्यति मैथिलीम् ॥ ५६ ॥

स तद्दुरात्मा सुहृदा निवेदितं
वचः सुधर्म्यं प्रतिगृह्य रावणः ।
गृहं जगामाथ ततश्च वीर्यवान्
पुनः सभां च प्रययौ सुहृद्वृतः ॥ ५७ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com